ग्रहलाघवम्
पाताधिकारः

शास्त्री-III

Date 17.12.20
Page 1

पातस्य गतगम्यसाधनप्रकारः—

पदे युग्मौजेऽर्कः समविषमगोलः सतमसस्-
तदायातः पातस्त्वगत इतरत्वे निगदितात्।
विभिन्ने गोले चेदिह कृतशराङ्कैर्लघुतरा
रवेर्दोर्भागाः स्यादिह रविपदान्यत्वमुचितम्॥

अन्वयः— सतमसः अर्कः युग्मौजे पदे समविषमगोलः तदा पातः यातः। निगदितात् इतरत्वे तु अगतः। इह विभिन्ने गोले चेत् कृतशराङ्कैः रवेः दोर्भागाः लघुतराः, इह रविपदान्यत्वम् उचितं स्यात्।

तारा— अर्कः सूर्यः, यदि युग्मौजे पदे सतमसः सायनार्कात्, क्रमेण समविषमगोलः, तदा पातः, यातः गतः, स्यात्। निगदितात् पूर्वोक्तलक्षणात्, इतरत्वे भिन्नरूपत्वे सति अगतः गम्यः, पातः स्यात्। इह सूर्यः विभिन्ने गोले चेत्, कृतशराङ्कैः साधितशरचतुर्थांशात, रवेः सूर्यस्य, दोर्भागाः भुजांशाः, लघुतराः, तदा इह रविपदान्यत्वम्, उचितं, स्यात्।

भावार्थः— साग्रर्क और सायनसूर्य एक गोल में हों और सायनसूर्य समपद में हो अथवा साग्रर्क और सायनसूर्य भिन्न गोलों में हों और सायनसूर्य विषमपद में हो तो पात हो चुका है। इसी प्रकार साग्रर्क तथा सायनसूर्य भिन्न गोल में हों और सायनसूर्य विषमपद में हो, अथवा उक्त दोनों भिन्नगोलीय हों और सायनसूर्य समपद में हो तो पात (क्रान्तिसाम्य) होने वाला है, ऐसा समझना चाहिए।

डॉ० सुदिप्त कुमार
सहा० प्राचार्य (ज्योतिष)
रा० उ० सं० महावि० सुखसेना,
पूर्णियाँ।

शरस्पष्टसाधनप्रकारः —

खेकादिके रविभुजांशदशांशके स्या-
द्धारोऽर्कविश्वमनुधृत्युडवोऽङ्गरामाः।
खाश्वा द्विशत्युडुगुणास्तु शराद्धराप्त्या
हीनोऽत्र सद्यपमसंस्कृतये स्फुटः स्यात्॥

अन्वयः — रविभुजांशदशांशके तु खेकादिके अर्कविश्वमनुधृत्युडवः अङ्गरामाः खाश्वाः द्विशती उडुगुणाः हारः स्यात्। अत्र हि ~~[illegible]~~ शरात् हराप्त्या हीनः सः अपमसंस्कृतये स्फुटः स्यात्।

तात्पर्य — रविभुजांशदशांशके खेकादिके शून्यमारभ्यैकद्व्यादिके, क्रमेण अर्कविश्वमनुधृत्युडवः १२।१३।१४।१८।२६, अङ्गरामाः ३६, खाश्वाः ६०, द्विशती २००, उडुगुणाः ३२६ क्रमात् हारः स्यात्। अत्र शरात् हराप्त्या हरभक्तशरतः प्राप्तलब्ध्या, हीनः सः, अपमसंस्कृतये क्रान्तिसंस्काराय, स्फुटः स्यात्।

भावार्थः — सायनसूर्य के भुजांशों में १० का भाग देने से जो लब्धि मिले उसके बराबर में लिखे हुए हाराङ्क और एकाधिक लब्धि के अन्तर से शेष अंशादि को गुणा करें। जो गुणनफल हो उसमें १० का भाग दें। जो लब्धि मिले उसमें पहले लिखे हुए हारांकों को जोड़ देने से योगफल हार होता है। फिर पहले लाये हुए शर में हार का भाग दें। जो लब्धि मिले उसको शर में से घटा देने से जो शेष रहे वह स्पष्टशर है।

सूर्य के भुजांशों का दशमांश शून्य १ आदि के समान हो तो क्रम से अर्क १२ विश्व १३, मनु १४, धृति १८, उडु २६ अङ्गराम ३६ खाश्व ६० द्विशती २०० उडुगुण ३२६ ये हारांक होते हैं।

डॉ० सुदिष्ट कुमार
सहा० प्राचार्य (ज्योतिष)
रा०उ०सं० महावि० सुखसेना,
पूर्णियाँ।

शास्त्री-III

शरखण्डैः शरसाधनप्रकारः —

पञ्चधा सागराः पञ्चधा वह्नयो द्वौ चतुर्धा कुभूखाभ्रमङ्का इषोः।
साग्निनाड्योर्लवैक्यंशतुल्यैक्यकं शेषभोग्याहतीषवंशयुक्स्याच्छरः॥

अन्वयः– सागराः पञ्चधा वह्नयः पञ्चधा द्वौ चतुर्धा कुभूखाभ्रम् इषोः अङ्काः स्युः। साग्निनात् दोर्लवेषु अंशतुल्यैक्यकं शेषभोग्याहतीषवंशयुक् शरः स्यात्।

तारा – सागराः पञ्चधा ४।४।४।४।४ पञ्चधा वह्नयः ३।३।३।३।३ चतुर्धा द्वौ २।२।२।२ कु १ भू १ ख० अभ्र० इति इषोः शरस्य अङ्काः स्युः। अतः साग्निनात् सराहुसूर्यात्, दोर्लवेषु अंशतुल्यैक्यकं खण्डानामैक्यं कार्यम्। शेषभोग्याहतीषवंशयुक् शेषांशभोग्यखण्डघातपञ्चमांशेन युक्तं शरः स्यात्।

भावार्थः– सागर ४ को पाँच स्थानों में लिखें। वह्नि ३ को पाँच स्थानों में लिखें। द्वि २ को चार स्थानों में लिखें। कु १, भू १, ख ० अभ्र ० ये १८ शरांक हैं। साग्न्यर्क के भुजांशों में ५ का भाग दें। जो लब्धि मिले, उतने शरांकों का योग करें और एकाधिक लब्धिपरिमित शराङ्क से शेष अंशादि को गुणा करें। जो गुणनफल हो, उसमें ५ का भाग दें। जो लब्धि मिले, उसमें पहले के शरांकों का योग कर देने से शरसाधन होता है।

शराङ्कतालिका

क्रमांक	१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६	१७	१८
शरांक	४	४	४	४	४	३	३	३	३	३	२	२	२	२	१	१	०	०

डॉ० सुदिप्त कुमार
सहा० प्राचार्य (ज्योतिष)
रा०उ०सं०महावि० सुखसेना,
पूर्णियाँ।